DR. BHAU DAJI MEMORIAL डाक्टर भाऊ दाजी स्मारकम्

श्रीवीतरागायनमः ॥ श्रियं क्रियाद् सर्वज्ञज्ञानज्योतिरनश्वरीमू विश्वंप्रकाशयाच्चिन्ता मणिश्चिन्तार्थसाधनः ॥ १ ॥ नमस्तमप्रभा वाभि भू
त भूद्योत हेतवे लोकोपकारिणोशद्वा ॥ ब्रह्मणोद्वादशास्यने ॥ २ ॥ स्वस्ति श्रीसकलज्ञानसाम्राज्यपदमाप्तवान् ॥ महाश्रमणसंघाधि पति
र्यः शाकटायनः ॥ ३ ॥ एकश्शब्दोमूबुधिम्बुद्धि ॥ मन्दरेणप्रमथ्यथः ॥ सयज्ञः श्रीसमुद्दध्रे ॥ विश्वंव्याकरणामृतम् ॥ ४ ॥ स्वल्पग्रंथ
रचोपायं ॥ संपूर्णंयदुपक्रमम् ॥ शब्दानुशासनंसार्वं ॥ महच्चासनयत्परम् ॥ ५ ॥ इष्टिर्नेष्टिश्चवक्तव्यं ॥ वक्तव्यंसूत्रतःपृथक्पूर्वंरव्या
तन्योपसंख्यानं ॥ यस्यशब्दानुशास्ने ॥ ६ ॥ तस्यातिमहतींवृत्तिं ॥ सहत्येयंलघीयसी ॥ संपूर्णलक्षणावृत्ति ॥ वक्ष्यतेयक्षवर्म
णा ॥ ७ ॥ ग्रन्थविस्तरभीरूणां ॥ सुकुमारधियांमयम् ॥ शुश्रूषादिगुणान्कर्तुं ॥ शास्त्रेसंहरणोद्यमः ॥ ८ ॥ शब्दानुशासनस्यान्व
र्थाख्यिन्तामणेरिदम् ॥ वृत्तेर्ग्रन्थप्रमाणन्तु ॥ षट्सहस्रन्निरूपितम् ॥ ९ ॥ इन्द्रचन्द्रादिभिश्शब्दैर्यदुक्तंशब्दलक्षणम् ॥ तदिहास्ति
समस्तञ्चयन्नेहास्तिनतत्क्वचित् ॥ १० ॥ गणधातुपाठ्योर्गणधातुलिंगवृत्तिशासनेलिंगगतम् ॥ औणादिकवृत्तादौशब्दसिद्धशेषसंग्रह
विन्तोविद्यात् ॥ ११ ॥ बालावबोधजनोव्यस्या ॥ वृत्तेरभ्यासहेतवे ॥ समस्तंबाङ्मयंवेत्ति ॥ वर्षेणैकेननिश्चयात् ॥ १२ ॥ नमस्तुत्रस्यादाव
यमंगलश्लोकः ॥ नमःश्रीवर्धमानायेत्यादि ॥ शास्त्रार्थसम्बन्धाभिधेययोग्यताऽथवाऽऽगमप्रयोजनोपायोपेयभावाख्येयेनसर्वसत्वहितेनन
त्वहितेनतत्वतः प्रज्ञापिताः तस्मैश्रीमतेमहावीरायसाक्षात्कृतसकलद्रव्यायनमस्करोमीत्यध्याहारः ॥ इतिविघ्नप्रशमनार्थमर्हद्देवता
नमस्कारमूपरममंगलमारभ्यभगवानाचार्यश्शाकटायनश्शब्दानुशासनम् शास्त्रमिदंप्रारभते ॥ धर्मार्थकाममोक्षेषुतत्वा
र्थावंगतिर्यतः ॥ शब्दार्थज्ञानपूर्वैतिवैद्यंव्याकरणंबुधैः ॥ ॥ अइउण । ऋऌक् । एओङ् । ऐऔच् । हयवरलञ् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर्ँ । हल् ॥ १३ ॥ इतिवर्णसमाम्नायः ऋमानुबंधोपादानः प्रत्याहा
रयन् शास्त्रस्यस्वाध्यायार्थः ॥ सामान्याश्रयणाद् दीर्घप्लुतानुनासिकग्रहणम् ॥ ह्रस्वदीर्घप्लुतहलोत्येकद्वित्रिमात्रिकाः ॥ नासिकामनु
स्थातवर्णःस्यादनुनासिकः ॥ ऋइत्यनेनवर्णस्यापियहणंभवति ॥ दूरादामंत्र्यस्यगुरूर्वैकोलन्तूदितिलुग्रहणात् ॥ तथाच । ऋत्यक
इतिलुकारेपिसिद्धम् ॥ हकारस्यद्विरूपदेशोपादेयवलादेर्यहणार्थः ॥ हकारादिष्वकारादयउच्चारणार्थाः ॥ सात्मेतत् ॥ १ ॥ संज्ञासू
त्रमेतत् ॥ इतासहोच्चार्यमाणोवर्णःसमुदायोवायआत्मनः प्रभृत्यात्मादितोव्यवस्थितानांसंज्ञाभवत्यात्मनाख्ह ॥ अण्

अनू । अच् । हल् । सुप् । सुट् । तिङ् । तस् । संज्ञानि यमनिषेधाधिकारनित्यापवादविधिपरिभाषाः ॥ अतिदेशविकल्पावितिगतयश्शब्दानु
शासनेसूत्राणाम् ॥ उतास्वः ॥२॥ उकारेणेतासहोपादीयमानोवर्णस्वस्य वर्णस्यसंज्ञाभवत्यात्मनासह । कुचुदुतुपु । तेयान् ॥३॥ तकारेणे
तासहोपादीयमानोवर्णइयान् ॥ यावन्मात्रउपात्तस्तावन्मात्रएवासौवेदितव्यः । अत् । इत् । उत् । भाव्योग् ॥ ४ ॥ भाव्योविधेयः प्रत्ययविका
रागमरूपः ॥ अगकारकोवर्णः इत्यानेववेदितव्यः ॥ भिक्षुः अस्यै · अस्याभिः । लविता । अग्नितिकिं । असुमू · असुमू · अमू · अमयोगीत् ॥ ५ ॥ इ
होपदिश्यमानोवर्णःसंसुदायोवायोलौकिकेशब्दप्रयोगेनदृश्यतेसइत् । संतोभवत् ॥ एधि । एधते । अइउण । अण् । दुवेपूङ् । वेपथुः ।
ऊकऽऋ । कृत्रिमम् । स्वंस्थानास्येभ्ये ॥ ६ ॥ स्थानंकराद्यादि । अस्यमूसुखम् । ओष्ठात्प्रभृतिप्राक् काकलकात् । तत्रभवम् । स्पृष्टादिप्र
यत्नपञ्चकमास्यम् । कराक्षेषमूर्द्वीजेदन्तोरसातुनासिकावर्णानांमूँ ॥ स्थानान्यास्यंस्पृष्टेषत् । स्पृष्टविवृतसंवृतेषद्विवृतम् । त
योरभेदे वर्णोवर्णस्यस्वेनाभवेदितव्यः । अकुहविसर्जनीयजिह्वामूलीयाः कराद्याः । कुर्जिह्वामूले । हविसर्जनीयाउरस्यो । जिह्वामूलीयो
जिह्वः ॥ सर्वमुखस्थानमवर्णमित्येके । इणएचुयशाःतालव्याः । एऐकराठतालव्याबेकेषाम् । उओ । ओष्ठ्यौपध्मानीयाओप्मः ॥ ७ ॥ अआऔ
कराठेभावेकेषाम् · ओदन्तोष्ठ्यः ॥ सृकस्थानएतेषाम् । मृदुरषामूर्द्धन्याः ॥ रेफोदंतमूलएकेषाम् ॥ लुतुलहादन्त्याः । नासिक्योनु
स्वारः । कराद्यानासिक्यएकेषाम् । अस्यम् । स्पृष्टम् । करणंस्पर्शानाम् । ईषत्स्पृष्टमन्तस्थानाम् · ---- विवृतमूष्मणांस्व रा
णाञ्च । एओविवृततरौ । ताभ्यामेओ । ताभ्यामवर्णः । ईषद्विवृतमूष्मणाम् । संवृतमकारस्येति । अअइत्यकारः । उदात्तोनुदात्त
स्वरितश्चानुनासिकोननुनासिकश्चेतिषट् · एवंदीर्घप्लुतावितिद्वादशवर्णभेदाः । परस्परंस्वस्वेभवन्ति । एवमिवर्णादीनान्त्वष्टादशभे
दाः । लुवर्णस्यानुकरणादन्यत्रदीर्घोनास्तीतिद्वादशभेदाः एवंह्रस्वाभावाद्वादशभेदाः । यवलानामनुनासिकोननुनासिकश्चे
तिद्वौभेदौ । वर्ग्याः पञ्चपञ्च । रेफोष्मणांस्वेनसन्ति । आसन्नः ॥ ७ ॥ इहासन्नानासन्नप्रसंगेस्थानगुणप्रमाणादिभिर्व्यवधानस्यासन्न
एवविधिरूपात्तोवेदितव्यः । तत्रस्थानेन । दीर्घः ओकाग्रम् । मुनीन्द्रः । गुणेन । केनिद्व्रजः । कुर्धिति । पाकः । त्यागः । चकारस्याघोषस्या
त्यप्राणस्यतादृशएवककारोभवति । जकारस्यघोषवतोत्यप्राणस्यतादृशएवगकारोभवति । प्रमाणेन । दोर्मोस्याद्दसोमात्
सुश्रावित्यसन् । अस्मुभ्यं अस्मभ्यं । मात्रिकस्यमात्रिकः । द्विमात्रस्यद्विमात्रः । अर्थेन · मानिरूपेकार्थ्योरूपन्यतोनुः बातराऊ ॥२॥

युवति · दारदवंदारिका · वतराडीशब्दस्यअपत्यार्थस्यतदर्थेवातरास्यभावः दरच्छब्दस्यदारदः संबन्धिनांसम्बंधे ॥ ८ ॥ सम्बंधिशब्दा
नांयत्कार्यमुच्यतेतत्सम्बन्धेसत्येवभवति · नान्यत्र श्वशुरार्थः श्वशुर्यः संज्ञायाम् । श्वशुरादिभ्येवश्वाशुरिं । षड्डतिसंख्या ॥ ९ ॥ षतु
डतिप्रत्ययान्तंसंख्याशब्दभवति · एकादिकासंख्या · तत्कार्यंप्रतिपद्यतइत्यर्थः यावत् · कृत्वः · यवद्वा · यावत् · कृत्वः यतिधा · यतिकृत्वः
बहुगणम्भेदे ॥ १० ॥ बहुगणइत्येतौशब्दौभेदेवर्तमानौसंख्याशब्दभवतः भेदोनानात्वम् · एकत्वप्रतियोगि · बहुकः बहुधा · बहुकृत
त्वः गुणकः गणधा · गणकृत्वः भेदइतिकिं · बेपुत्येसंघेचमाभूत् · कसमासेध्यर्थः ॥ ११ ॥ अध्यर्धशब्दः कप्रत्ययेविधात्तव्येसमासे से
चसंख्याशब्दभवति · अध्यर्धकम् · अध्यर्धशूर्पकं क्रीतेप्रत्ययस्यद्विगोष्ठञ्कञ् · अर्धपूर्व · पदोडत् ॥ १२ ॥ अर्धपूर्वपदोडत्प्रत्ययांतःशब्दः
कसमासयोः संख्याशब्दभवति · उदितिसंख्यापूरणेडडित्यादिभ्यआदिशब्देस्त्रीयतस्तत्कारेणप्रत्याहारः अर्धपञ्चमकम् · अर्धपञ्चमशूर्पकम्
पौत्रादिशब्दम् ॥ १३ ॥ परमप्रकृतेरपत्यवतः यत्पौत्राद्यपत्यंतद्बहुसंज्ञंभवति · गर्गस्यापत्यंपौत्रादिगार्ग्यः वात्स्यः अनन्तरापत्यंगार्गिः व
त्सिरित्येवभवति · प्रपौत्राद्यस्त्रीवंश्यज्यापोभ्रात्रोस्सतियुवा ॥ १४ ॥ प्रपौत्रः पौत्रापत्यम् परमप्रकृतेश्चतुर्थः वंशभवोवंश्यः पित्रादिरात्मनः
कारणम् · ज्यायान्भ्रातावयोधिकः एकपितृकएकमातृकोवापरमप्रकृतेःप्रपौत्राद्यपत्यंस्त्रीवर्जिंवंश्येसतिजीवतिपुत्रादिः ज्यायासिच
भ्रातरिकनीयान्भ्रातायुवसंज्ञोभवति · गार्ग्यायणः वात्स्यायनः परमप्रकृतिर्गार्गिः तस्यानन्तरापत्यंगार्गिः तदनन्तरापत्यंच
द्वैगार्ग्यः · तृतीयस्यात् · चतुर्थेगार्ग्यायणेवावा · प्रपौत्रादीतिकिं · पौत्रोगार्ग्यः · अस्त्रीतिकिंमू · स्त्रीगार्गी · सत्सापिराडेधिवयस्था
नेवा ॥ १५ ॥ ययोः पूर्वः सप्तमः पुरुषः एकस्ताभ्यान्योन्यस्यसपिण्डोवयोयोगनादिस्थानमूपितरपुत्रइत्यादि परमप्रकृतेःप्रपौत्राद्यपत्यस्त्रीवर्जि
तंवयस्थाभ्यान्द्वाभ्यामप्यधिके · सपिण्डेजीवतिसतिसज्ञीवदेवयुवसंज्ञंवाभवति · पितृव्ये · पितृव्यस्यपितम् · पितामहे पुत्रेवा वयोधि
केजीवति गार्ग्यस्यापत्यंजीवत् · गार्ग्यायणोवागार्ग्यः वात्स्यः वात्स्यायनोवा सदित्यादिकिं अन्यत्रगार्ग्यः · स्त्रीगार्गी · युवद्वंकुत्साऽऽ ॥ १६ ॥
युवाचबहुष्वपत्यंयथाकमंकुत्सायामर्थाच्चविषयेयुवसंज्ञंवाभवति · गर्गस्यापत्यंकुत्सोयुवागार्ग्यः गार्ग्यायणोवा आत्मःगुरुमान्भूत्वा
स्वतंप्रउच्यते · अन्यत्रगार्ग्यायणएव · गर्गस्यापत्यंहैवंमर्ह्यितंगार्ग्यायणः · गार्ग्येकि · अन्यत्रगार्ग्यएव · नामदुः · ॥ १७ ॥ यन्नामधेयंसंव्यवहा
रायहीयतेतन्निमुच्यते · देवदत्तादितद्दुसंज्ञंवाभवतिदेवदत्तीयाः देवदत्ताः । यदादिः ॥ १८ ॥ यदादयः शब्दानित्यंदुसंज्ञाभवन्ति · यदीयम्

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

किनीयम् · तादयनिः · त्यदादिः सर्वाद्यन्तर्गणः यस्याकम्बादिरादेचू ॥१९॥ यस्यशब्दस्याचामादिचू आकारएत्वादुसंतोभवति · आम्र युष्मायनिः · आम्बक्षयः · स्वेवीर्य्यः · रेतिकामनीयः · औपगवीयः · देशाएचेइठादौ ॥२०॥ देशाएववर्तमानस्यशब्दस्याचामादिरेउःभवति सच्छादौप्रत्ययेषि धातव्ये दुसंतोभवति · सैपुरिकी · सैपुरिका · स्कोनगरिकी स्कोनगरिका सेपुरंस्कोनगरञ्चबाहीकग्रामो · एवकरो नियमार्थः · तेनदेशेत्यर्थचचवर्तमानस्यनभवति · छादावितिकिं · क्रिभारोनभवति · पारेदेशे ॥२१॥ प्राग्देशेवर्त्तमानस्य यस्यशब्दस्याचा मादिरेउः सच्छादौप्रत्ययेदुसंतोभवति · शरावतीनामनदी · तदपेक्षाप्राग्दृग्व्यवस्था · एणीपचनीयः गोनर्दीयः एकचक्रकः · नियमार्थ मित्यर्थवचनम् · क्रियाधातुः ॥२२॥ क्रियाप्रवृत्तिः पूर्वापरीभूतासाध्यमानरूपासाअर्थोअभिधेयंयस्यससोधातुसंतोभवति · भू भव ति · एधि · एधते · गोपाय · गोपायति · पापच्यते · पुत्रकाम्य · पुत्रकाम्यति · इहिछत्रयेणानुसारित्वा दुक्षणस्य अणपयत्यादिनिवृत्तिः · दा धाघ्वदाप् ॥२३॥ दारूपोधारूपश्चयोधातुः सोबकारानुबन्धोधुसंतोभवति · दारुपाश्चत्वारः · धारूपोहौ · दाण् · प्रणिदाता · देउ · प्रणिदय ते · उदाज् प्रणिददाति · दोप्रणियति · धेट् · प्रणिधयति · डुधाञ् · प्रणिदधाति · अबितिकिं · दाप् · दातम् · बर्हिः · देप् · अवत्तादातम्मु खम् · प्रादिर्नाप्रत्यये ॥२४॥ प्रादिस्त्वाद्यन्तर्गणःघनधातुर्द्योतोरवयोनभवति · तंस्युदस्य ननः परएव धातुसंतोवेदितव्यः अप्र त्यये · नचेनतः प्रत्ययः परोभवति · अभ्यमनायत · अभिमिमनायिषते · अभिमनाय्य · प्रासादीयत् · प्रासिसादीयिषति प्रासादीय · अप्रत्यये इतिकिं · औत्सुक्यायत · उत्सुक्यायिषते · उत्सुक्यायित्वा · असंग्रामयता सुरस्त्यत्रसंग्रामस्त्येतावन् युद्धार्थोधातुर्नात्र सम् प्रादिः तस्यागताद्यर्थाधिपर्यायोस्त्यतिक्रमात्युपसर्गः प्राक्त्व ॥२५॥ तस्यधातोस्सम्बन्धीतदर्थद्योती प्रादिरूपसर्गसंतोभवति प्राक्त्वततोधातोर्भवति · योगताद्यर्थाधिपरियोवार्च्यो विषयेसुअतिरिति यश्चानिक्रमविषयः अतिइतिनानेतान्वर्जयित्वा · प्रारब्धभः परिणमति · अभिषिञ्चति उपसर्गत्वेनादि · तस्येतिकिं · वृक्षवृक्षमभिसिच्यते · अगतेत्यादितिकिं · अध्यागच्छति · आगच्छत्यधिपर्यागच्छ ति · आगच्छतिपरि · अध्यागयनिकः पर्यायनितम् · उपरिभावस्यसर्वतोभावस्यचप्रकरणादेः · प्रतिपत्तोगताद्यर्थत्वम् अप्रतिपत्तौ अ ध्यागच्छतिपर्यागच्छतीति प्राक्त्वमेव · अर्च्यास्तुतिसुसिक्तम्भवता अतिस्तुतम्भवता अत्र धात्वर्थः प्रशस्यते अन्यत्रसुषिक्तम्भवतेति कुत्स्यते · अतिक्रामति · अतिसिक्तमेवभवता · अतिस्तुत्वायदर्थंकियातस्मिन् कार्य्येनिष्पन्नेपिक्रियाप्रवृत्तिरतिक्रमः अन्यत्रअ ॥२॥

तिशय्य प्राक्त्वेत्यधिकारः · आगव्ययसंतापाः डाच्व्युर्य्यायनुकरणभ्रति ॥२६॥ डाजन्तव्यन्तमूरीत्येवमाद्यनुकरणमुपसर्गसंज्ञ — धातो स्सम्बन्धितिसंज्ञंभवति · डाचू · पठपठाकृत्य · सपत्राकृत्य · चि · सुकूकृत्य · घटीकृत्य · उर्य्यादि · उरीकृत्य · उररीकृत्य · अनुकरणम् ख्यातकृत्य · कृकृत्य · उपसर्गः । प्रकृत्यपरिहृत्य · चिडाचू · साधर्म्यादूर्यादीनां कृभ्वस्तिभिरेवयोगेतिसंज्ञा · ऊर्य्यादयोगणपाठेष्वा कारिकाक्रमदोक्ताः सदसद्स्थित्यादिभूधातुपदेशाअपरिग्रहादरक्षेपे ॥२७॥ स्थित्यादयोभूधातुपदेशाअपरिग्रहआदरक्षेप · इत्येतेषु चार्थेषु यथासंख्यंकारिकाअसत्त्वम् · अदस् · अन्तर् · सत् · असत् · इत्येतेशब्दाधातोस्तिसंज्ञाभवति · स्थितिमर्य्यादाशक्तिर्वाआदिशब्दाद्य तादिगृह्यते · तत्रकारिकाकृत्य · भूपामराउनभ् · तत्र · अदंकृत्य · स्वयंपरामर्शेनुपदेशः तत्र अदः कृत्य · परिग्रहः · स्वीकारः तदभावे · अनादृत्य · आदरक्षीत्यासंभ्रमः · तत्र · सत् · कृत्य · क्षेपः · परिभवः · तत्र · असत् · कृत्य · स्थित्यादावितिकिम् · कारिकांकृत्वा · कर्त्तुमित्यर्थः · अदंकृत्वा · माकारीत्यर्थः अदः कृत्वागतः अयम् परस्योपदेशः · अन्तर्हृत्वाभूषिकांश्येनागतः परिरक्षेत्यर्थः · सत्कृत्वाविद्यमानमित्यर्थः · असत्कृत्वाविद्यमानमित्यर्थः कृणोमनः श्रद्धोच्छेदे ॥२८॥ कृणोमनस्इत्येतौशब्दौश्रद्धायाअभिलाषस्योच्छेदेधातोस्ति संज्ञोभवतः कृणुहत्य · मनोहत्य · श्रद्धामुच्छिद्येत्यर्थः · अन्यत्रतराउलस्यकृणोहत्वा · मनोहत्वागतः · असम्पुरोव्ययम् ॥२९॥ असम्पुरस्इत्येतावव्ययौधातोस्तिसंज्ञोभवतः · असंगत्य · पुरस्कृत्य · असमितिनाशोवर्तते · अनव्ययेअसंकृत्वाधिरसमित्यर्थः पुरःकृत्वानगरीत्यर्थः · गत्यर्थवदोच्छः ॥३०॥ अञ्चेयेतदव्ययमभिशब्दार्थेदृढार्थेचवर्त्ततद्द्योत्यर्थस्यवदेश्चधातोस्सम्बन्धितिसंज्ञंभवति · अञ्चगत्य · अञ्चव्रज्य · अञ्चोद्य · अव्ययमितिकिं · अञ्चसुदंकृत्वा · तिरोन्तर्धौ ॥३१॥ तिरस्इत्येतदव्ययंद्वैधीभावेवर्त्तमानंधातोस्सम्बन्धितिसंज्ञंभवति · तिरोकृत्य · तिरोधाय · अन्यत्रतिरोभूत्वास्थितः · तिर्सगभूत्वेत्यर्थः कृत्वोवा ॥३२॥ तिरस् इत्येतदव्ययंद्वैधीवर्त्तमानंकृञोधातोस्सम्बन्धितिसंज्ञंवाभवति · तिरस्कृत्य · तिरःकृत्वा · मनस्यूरस्युपाजेन्वाजेमध्येपदेनिवचने ॥३३॥ म नसिउरसिउपाजेअन्वाजेमध्येपदेनिवचने इत्येतान्यव्ययानिकृञोधातोस्सम्बन्धीनितिसंज्ञानिवाभवन्ति · उरसिमनसि · अनत्याधान विषये अत्याधानमुपक्षेपः आश्चर्य्यञ्च · मनसिकृत्य · मनसिकृत्वा · उरसिकृत्य · उरसिकृत्वा · उपाजेकृत्य · उपाजेकृत्वा · अन्वाजेकृत्य · अन्वाजेकृत्वा · मध्येकृत्य · मध्येकृत्वा · पदेकृत्य · पदेकृत्वा · निवचनेकृत्य · निवचनेकृत्वा · स्वाम्यधिः ॥३४॥ अधिरित्ययमुपसर्गः · स्वामि

भाव विषये कृ ओधातोस्सम् भीतिसंज्ञो भवतिवा · देवदत्तंग्रामेधिकृत्य · ग्रामेधिकृत्वा · स्थामिनंकृत्वेत्यर्थः · अन्यत्रअर्चीत्यधिकृत्य · प्रादिरुपसर्गइतिवर्त्तते · तेनोपसर्गसंज्ञापि विकृत्यते इतिकृत्वाधिप्राक्रुस्यानियमः · साक्षादाद्यार्च्चि ॥३५॥ साक्षादित्यादिशब्दरूपं अर्च्चिव्यर्थमव्ययंतंकृञः सम्बन्धिसंज्ञंवाभवतिसाक्षात्कृत्य · साक्षात्कृत्वा · मिथ्याकृत्य · मिथ्याकृत्वा · अर्च्चीतिकिं · अवणीकृत्य · उष्णीकृत्य · नित्यंहस्तेपाणौस्वीकृतौ ॥३६॥ हस्तेपाणावित्येताभ्यांयोऽर्थआत्मीयीकरणे कृञस्सम्बन्धिनोतिसंज्ञोनित्यम्भवतः हस्तेकृत्व · पाणौकृत्य · अन्यत्रहस्तेकृत्वा · कार्षापणंगतः · जीविकोपनिषदिवे ॥३७॥ जीविकाउपनिषत् इत्येतोशब्दोऽर्थार्थगम्यमानेकृञस्सम्बन्धिनोतिसंज्ञोनित्यम्भवतः · जीविकामिवकृत्वा · जीविकाकृत्य · जीविकाकरोति · उपनिषत्कृत्य · उपनिषत्करोति · अन्यत्रजीविकांकृत्वा · उपनिषदंकृत्वा · प्राध्वम्बन्धे ॥३९॥ प्राध्वमित्येतन्नकारान्तमव्ययमानुकृत्येवर्त्ततेतदानुकृत्ये बन्धहेतुकेवर्त्तमानंकृञः संबंधिसंज्ञंभवति · प्राध्वंकृत्य · अन्यत्रप्रगतमध्वानम् प्राध्वंगत्वाशकटंकृगतः · तस्यचनाप्राप्तस्यांचक्रान्त्वन्तिसुप्तस्याभस्यचरादीन्यव्यम् ॥३९॥ तस्वत्उमू इत्येतदन्तानिधरावर्ज्जितस्यन्तानि अमक्रा अमूनुम् इत्येतदंन्तानि संज्ञानिसुउमस्प्रातिरूपाणिचरादीनिचशब्दरूपाण्यव्ययसंज्ञानिभवन्ति · तसू · एकदिशितस्प्रकृतेर्मूलतोविद्योतते · वृत् · सुनिवृतम् · उम् · उच्चैस्समाम् · अधणसि · रामादितः रावणादितः सर्वतः · सर्वत्र · बहुशः · तसीतिव्याप्तेश्चायेसित्याप्तेश्चसेरिकोरण · प्रत्याहारः अधणितिकिं · पधिहेधानि · संशयप्रेधानि · आम् · दयाञ्चक्रे · विदाकरोतु · एका · कृता · धृत्वा · आमूर्वमूमो जम् · कन्यादशंवरयति · तुमू · कर्त्तुम् · ति · अदः कृत्य · अव्ययत्वान्नसिः सुउभः · रात्रौवेलायाम् · आसिस्यात् · प्रस्वाभः यथातथा · कथंकृतः तसुरितिप्रत्याहारभ्य आकथमित्थमोरुकारेणप्रत्याहारः · स्वरादि · स्वस्तिष्ठति · अंतसिष्ठति · उपकरोति · सदधंतृ पुलिंगेषुसर्वासुचविभक्तिषु · वचनेषुचसर्वेषुयत्नव्येतितदव्ययम् · तसादिग्रहणाम्किम् · एकः · द्वौबहवः ॥ आपोवर्षाः स्वरादयोगण पाठेद्रष्टव्याः घसख्यद्वन्द्वपतीदुत् ॥४०॥ इकारान्तसुकारान्तऋशब्दरूपंधिसंज्ञंभवति · सखिशब्दद्वन्द्वानवयवञ्चपतिशब्दंवर्ज्जयित्वासुनिनासधुना · सुनिसुतौसाधुयतो · असख्यद्वन्द्वपतीतिकिं · सख्यः सख्ये · पत्याः पत्ये · अद्वन्द्वग्रहणम्किम् · पतिसुतौ · पतिसखायौ · पतिसखीशब्दयोरयंप्रतिषेधः नससुदायस्यतेनेहभवत्येव · अतिसखेरागच्छति · बहुपतेः स्वम् · प्रत्ययः कृतोषष्ठ्याः ॥४१॥ इह

मः कृतोविहितः सः प्रत्ययसंज्ञोवेदितव्यः अष्ठ्याः · षष्ठ्यन्तार्थः षष्ठीनचेत्सषष्ठ्यन्तार्थस्यविहितोभवति · आगमोविकारोवेत्यर्थः · ङीरा न्नी · सु · औजस् · टाङसिङस् · ङसोस् · ङसाम् · ङ्यात्रड्यायान्नद्युतः ॥४२॥ इत्युङ इत्यारभ्यगुपोधूपिच्छिपन्पणेरायइत्यायप्रत्ययात् प्राग्यत्प्र त्ययसंज्ञंतद्धितसंज्ञंभवति · केशाकेशि · औपगवः · घ्यायतिङ्कृत् ॥४३॥ घ्यणादिप्रत्ययसर्ज्जन्तङ् वर्ज्जितं कृ घ्रंसंज्ञंभवति · धन घ्यात्यः गोदाघ्रजति · अतिडि तिकिं · प्रणिसेपरः ॥४४॥ यम्प्रत्ययःसघ्रकृतेः परएवभवति · दक्षः · दक्षौ · दक्षाः · मिदचोन्त्यात् ॥४५ मकारानुबन्धकोयस्यविधीयतेतस्याचामन्त्यात्परोभवति · वनस्ते · वनानि · स्पर्द्धे ॥४६॥ द्व्योर्विध्योरन्यप्रसङ्गकाशयोस्तुत्यबल योरेकत्रविनिपातस्यर्थसंश्रयः सूत्रपाठेपरः सविधिर्भवति · उत्वंकोतसति · कोधावति · लुकृ · एषकरोति · ससरतीति उभयप्राप्तौ परत्वा लुकृ · एषहसति · सधावति · परंस्यात्पूर्वपरयोर्नित्यंस्यात्तरनित्ययोः · नित्यात्तथान्तरंगंस्यात्ततोप्यवेनकाशकम् · षष्ठ्याः स्थानेन्तरतः ॥४७॥ षष्ठ्यंतार्थस्यविधीयमानोविधिस्तस्ययोन्योर्थस्तस्यस्थानेप्रसङ्गोभवतीतिवेदितव्यम् · नपोचोन्तस्थः ग्रामणिकुलम् · सेनानीकु लम् · तस्मादादेः ॥४८॥ तस्मात्षष्ठ्याः पंचमीविशिष्टस्यषष्ठ्यन्तार्थस्यपरस्यविधीयमानोविधिस्तस्यादेरवयवः स्थानेभवति · द्यन्त रुपसर्गादिदधोनात् · द्विपम् · अन्तरीपम् · शिदादिः दनू ॥५०॥ शिच्चादिः दत्वादेशः · षष्ठ्यन्तार्थस्यतस्यैवस्थानेभवति · नादरन्तस्यवाक्यस्य शित् · नञ्शसशशीः · वनानि · धनानि · अदिः दत्सामासः · सर्वेषां विश्वेषां · दिः दत्पर्य्युदास · किंजरायाऽस् · जरसा · जरसे · शेन्त इतिय सनिर्दिश्यमानस्यादेशः स्थानीवान्तलाश्रये ॥५१॥ यस्यस्थानेयोविधीयतेससस्थानीइतरआदेशः स्थानीवभवत्यादेशः स्था निकार्य्यम् · प्रतिपद्यतइत्यर्थः · अनलाश्रयेनचेतत्कार्य्यमस्थान्यलाश्रयम्भवति · युवाराजाः सुवद्वोपेपिन्यगितिदीर्घः पदत्वा दिच · कस्मै · कस्मात् · किंवत् · सर्वादित्वात्स्माआदि · अनलाश्रयइतिकिं · सः · पन्थाः अत्रस्थानिवत्वाभावात् · कुलः परत्वत्क णासोर्द्दुग्नभवति · आश्रययग्रहणंकिम् · प्रदीव्य · प्रसीव्यः वत्सादेरङ्गभवति परेचः वाचोकिदीर्घेयङ्याप्सद्स्वृग्विधौ ॥५१॥ अजादेश परनिमित्तकसतः पूर्वविधौकर्त्तव्येस्थानिवद्भवतिकिंविधिं दार्घस्यविधिंयकारस्यविधिंद्वित्वस्यविधिं आएतस्मादारभ्यदोमो स्मादसोमाद्भ्याधिन्यसन्नित्यसदधिकाराद्योविधिः संयोगस्यादिस्कोर्लुगितिलुग्वर्ज्जितंसञ्चवर्जयित्वा · कथयति · अवधीत् · तत्रालुगु पान्त्यविधौकर्त्तव्येस्थानिवद्भवति · पादिकः · अत्रपद्भावेकिंविप्यादिप्रतिषेधः किम् · देवयतेर्द्दर्यूः · त्वमावेष्टलोः · अत्रणिलु

गस्रोपोक्विविधावूचिनस्यानिवत्·शामंशामम्·अशामि·शंशमंशार्मम्·अशंशामि·अत्रणिराङन्तात्यङ्रायन्ताच्चखमुञिन्नीचणिलुङ्
ह्रुचोदीर्घविधौ·सोरिवलोपः·ब्राह्मणकराडूतिःअप्रह्वुग्यविधौ·यलुचि·दध्यत्र·मध्वपनय·अत्रयञ्धकारस्यह्रस्वविधौ·नयनम्·
वचनम्·वैय्याकरणः·सोवश्वः·यानिसन्ति·अग्निषन्ति·विषन्ति·अपयन्ति·वियन्ति·अत्रेङ्यञ्लुचोयादावासह्रौ·स्कुम्बिधि·प्रति
षेधः·किं·सुकुस्मयेतः·सुकूः·काष्टन्तक्षति·काष्टतत्·अत्रसंयोगस्यादिस्कोह्रुगितिलुचिस्थानिवद्भावात्·पदस्यतिलुक्·का
ष्टतडित्यरायन्ते·अरक्रुगितिप्रायिकोयन्निधः·तेनमधुश्च्युतमाचक्षाणोमधुगित्यप्रणिलोपस्यास्थानिवत्वात्·ह्रस्वह्रोश्च
इतिपर्य्युदासस्यसामर्थ्यात्शकारस्यापिसंयोगस्यादिस्कोह्रुगितिलुक्·षडिकह्रस्वषहित्यतोजश्र·श्चुत्विगेनत्॥५२॥
परस्यप्रत्ययस्यलश्चुचिसञ्ज्ञातायांश्चुग्भूतपरनिमित्तकंपूर्वकार्यंइक्एनदित्येतावेदवभवति·वेचेद्धि·शेगशवीति·जरिष
हीति·एनत्पश्य·एनच्छितकः·स्थानीवानलाश्रयइतिसिद्धेनियमार्थंवचनम्·तेनान्यानिनभवन्ति·लहूगर्गाः·ढिदादि·
॥५३॥द्विरुस्यविधीयतेसतस्यादिःप्रथमावयवोभवति·ह्रस्वद्वोश्चःगुडलिह्सोये·वत्सोदरिह्·वेदिता·वदितुम्·कि
र्दन्तः॥५४॥कियत्स्यविधीयतेसतस्यान्तावसानावयवोभवति·नक्षित्रियाजक्·भवान्स्वरः·हस्वस्यतक्·अग्निचित्·यो
गविभागउत्तरार्थः·विशेषणम्॥५५॥विशेषणंविशेष्यस्यसमुदायस्यान्तोभवति·नचोपोहस्वः·कीलालपम्·माम्
णिकुलम्·खूद्इत्यत्र·जयस्तव·तरः·प्राक्पञ्चमी॥५६॥पञ्चम्यन्तार्थविशेषणमसमानाधि·करणंविशेष्यात्प्राक्पूर्वं
मूभवति·पदाद्वाक्यस्यवस्नसोयुग्विभक्तेः·धर्म्मोवोवर्द्धताम्·धर्म्मोनोवर्द्धताम्·इहनभवति·युष्माकंभवोवर्धताम्·
नसप्तम्यध्यादिषु॥५७॥इहसप्तमीनिर्दिष्टंविशेषणंम्विशेष्यात्पूर्वंनभवति·घ्राणादि·विधेरन्यत्र·एवोच्चय
वायाव्·मुनये·साधवोघः·अनेनपरस्यायदिनभवति·अध्यादिष्वितिकिं·स्मरसिवत्सीमः·कलिंगेषुमाभूत्·त
स्यादिः॥५८॥तस्यसप्तम्यर्थस्यविशेषणान्तस्यादिरवयवोवेदितव्यः·जरायाड·सिन्द्रस्यान्वि·जरसः·ज
जरसाम्·इहनभवति·जरासुतथ्यते तेन·सप्तमीत्यस्य स्त्रीत्वनपरामृश्यते·प्रत्यभव्यस्य प्रकृत्यादेः॥५९॥ध्यादितियुरुषोत्तमस्या

नार्थेप्रत्ययमृणिञ्रत्यारभ्यायूनरितदित्यतस्तत्कारेणप्रत्याहारः·प्रत्ययोन्यङ्डुःपसर्जनञ्चष्यत्·विशेषणम्प्रकृत्यादेस्समुदायस्यवे
दितव्यम्·नोनाधिकस्यप्रत्ययः·मातृभोगीणः·खारपायणः·सुङ्पदमितिपदसंज्ञाऽनस्यनभवति·तेनभिन्नरतिणः·राज्ञःपुरु
षोराजपुरुषः·षष्ठ्यर्थनादितिसमासः·अधिकस्यासमुदायनस्यनभवति·वृद्धस्यराज्ञःपुरुषःपुत्रमिच्छति·पुत्रकाम्यति·सुपः
कर्तुःकाम्यः·अधिकानाभवतिमहान्तम्·पुत्रमिच्छति·न्यक्षत्·अतिकाशिपगन्धीबन्धुः·अतिकौसुदगन्धीबन्धुः·बन्धौष्यम्येश्
नभवति·अलुपसर्ज्जिनस्यादधिकस्यापिभवतिपरमकाशीपगन्धीबन्धुः·परमकौसुदगन्धीबन्धुः·सत्सतिकारकस्यापि॥६०॥
कृत्प्रत्ययःसतिसंज्ञिकस्यापिसकारअस्यसतिकारकस्यापिप्रकृत्यादेःसमुदायस्यविशेषणमूभवति·अपिशब्दात्केवलस्य
पि·उदकेविशीर्णम्·अवतप्तेनकुलम्·देवदत्तनखनिर्भिन्नम्·भस्मनिहुतम्·सांकोठिनम्·व्याकोशी·तिङाबाक्यम्॥६१॥इह
साक्षात्प्रत्ययेनतिङन्तस्यविशेषणंप्रयुज्यमानमप्रयुज्यमानंवातेनतिङन्तेनप्रयुज्यमानेनाप्रयुज्यमानेनवासहबाक्यस
ज्ञंभवति·धर्म्योवोरक्षतु·धर्म्योनोरक्षतु·साधुवोरक्षतु·साधुनोरक्षतु·ज्ञातीनान्तेओदनन्ददाति·ज्ञातिनाम्तेओदनन्ददाति·कुरूपि
ग्रामञ्चगच्छ·लुनीहीसनुश्वपिव·देवदत्तेनौदातव्यम्·देवदत्तेननोदातव्यम्·साकांक्षत्वेपितिङन्तभेदेबाक्यभेदार्थंवचनम्·
ओदनम्पचतवभविष्यतिममभविष्यति·पचंतवभविष्यति·ममभविष्यति·ओदनन्तवभविष्यतिममभविष्यति·अर्थात्प्रक
रणाद्वागतावप्रयोगः·सुङ्पदम्॥६२॥सुङितिप्रथमैकवचनाद्रारभ्यामहिङौङ·कारेणप्रत्याहारः·सुङन्तम्शब्दरूपंपदसंज्ञं
भवति·धर्मः·कर्म्म·पचतेः·अपचद्ब्रूमहेवः·नंक्ये॥६३॥नकारान्तशब्दरूपंक्ये प्रत्ययेपरतःपदसंज्ञंभवति·क्यइति·
क्यच्च्वीक्यङ्·क्यष्·क्यङ्छांविशेषकारानुबन्धानुक्सञ्ज्ञासाभान्येनग्रहणम्·राजीयति·राजायते·चर्मायति·उष्णायते·सुङि
त्येवमन्याविद्वत्यधातोः॥६४॥सितिबलादौचप्रत्ययेपरेपूर्वंपदसंज्ञंभवति·अधातोरनचेत्सप्रत्ययोधातोर्विहितोभव
ति·सितिभवदीयः·ऊर्णायुः·बलिपयोर्यां·पयःसुराजता·वाक्षम्·अधातोरिति किं·स्मरसिवत्सीमः·कलिंगेषुमाभूत्·त
॥४॥
स्यादिः॥५८॥तस्यसप्तम्यर्थस्यविशेषणान्तस्यादिरवयवोवेदितव्यः·जरायाड·सिन्द्रस्यान्वि·जरसः·ज
जरसाम्·इहनभवति·जरासुतथ्यते तेन·सप्तमीत्यस्य स्त्रीत्वनपरामृश्यते·प्रत्यभव्यस्य प्रकृत्यादेः॥५९॥ध्यादितियुरुषोत्तमस्या

भवति · यशस्वी · यशस्वान् · विद्युमान् · मरुत्वान् · मनुर्न्भोंगिरोवति ॥६७॥ मनुस्नभस् अंगिरस् इत्येतानि वतिप्रत्यये परे पदसंज्ञानि न
भवन्ति · मनुरिव मनुष्यम् · नभस्वत् · अंगिरस्वत् · धिरोमेगिदनाड्वानद्यश्चानुनासिकः ॥६८॥ विरतिर्विरामः विरामेवर्तमानस्यानोगिद
नाड्वदिवर्जितस्यतदासन्नोनुनासिकआदेशोबाभवति · साम · साम · खट्वा · खट्वा · दधि · दधि · मधु · मधु · विरामइतिकिं · दधिकरोति · अ
गिदनाड्वादीतिकिं · मुनी · साधू · विद्यु · अनांग्रहणंकिं · पटलीषुभाद्या · चर्जश्चः ॥६९॥ विरामेवर्तमानस्यजश्चास्थानेतदासन्नश्चरादेशो
बाभवति · तृष्णुप् · तृष्णुब्बाक् · वाग् · षट् · षड् · तम् · तद् · विरामइतिकिं · वागत्रान ॥७०॥ इतऊर्ध्वंपदस्यतेतद्विरामेवर्तमानस्यनभव
तीत्यधिकृतंवेदितव्यंदैपोपरिसमाप्तेः · तेआहुः · भवान्तुतानि ॥ एचोऽयवायाव ॥७१॥ एचस्थानेऽच्चिपरे · अय् · अव् · आय् · आ
य् · इत्येते क्रमेणादेशाभवन्ति · नयनम् · स्रवणम् · रायौ · नावौ · यजेवादिकः ॥७२॥ एचःस्थानेअवर्णात्परोयइग्यदिष्टस्यस्थाने अ
च्चिपरे यआदेशाएवभवति · नान्यः · अगमाम् · अग्निभूतानु · यत्रागच्छ · अगमा · तुः · पठा · नु · यत्रागच्छ · एवकारोदीर्घबाधनार्थः ·
अन्यथाहिपूर्वपरादा अभनन्तान्विधीन् · बाधनेनोत्तरांप्रतिह्रस्वस्यैवबाधास्यात् · अस्वे ॥७३॥ इकःस्थाने अस्वेचिपरेतत्सदासन्नोय
आदेशोभवति · दीर्घापवादः · दध्यशान मधुपुष्पः · पित्रर्थः · सारुति · दध्यृतकावदीयतामित्याह · अस्वेइतिकिं · दधीदम् · मधूष्णः · इको
यन्त्रिर्ध्वधानमित्येकेतेषामिकइति पञ्चमी · दधियत्र · मधुवत्र · तिरियङ् भूवादयः · ह्रस्वोथापदे ॥७४॥ इकःस्थाने स्वेचिपरेह्रस्वा
देशोभवतिबायअपवादः · नचेत्रविगचाएवैकत्र पदेभवतः · नदिरथा · नरोषाः · दधिअत्र · दध्यत्र · मधुअत्र · मध्वत्र · अतिएति · अत्येति ·
अनुएति · अन्वेति · ह्रस्वस्यापिह्रस्वः · पर्जन्यवल्लक्षणप्रवृत्तिः · अपदइतिकिं · नद्यौ · वध्वौ · नद्युदकम् · वध्वाननम् · मृत्वकः ॥७५॥ अकः
स्थानेऽतिऋकारेलुकारेचाचिपरेह्रस्वादेशोबाभवति · मतृकृषिः · महृषिः · धूलिकृतः · धूल्कृतः · वधुकृणम् · वध्वृणम् · कर्तृऋश्यः
कर्तृश्यः · लुति · तवल्कारः तवत्कारः तकारः किं · कन्याऋकारः · कन्यकारः · ऋवोः साचः ॥७६॥ उः ऋवर्णस्यलुवर्णस्याकः स्थाने ऋ
तिऋकारेलुकारेचाचिपरेपरेणाचासहितस्यऋर इत्यनेन समुदायोऽव्यञ्जनसमुदायोवर्णान्तरं बाईषत्स्पृष्टकरणमादेशोभवतिवा · पितृऋ
भ्यः · पितृभ्यः · लुति · पितृत्कारः पितृत्कारः · पितृकारः · लुवर्णस्य · पितृर्तकइत्याह · पितृऋतकइत्याह · पितृतकइत्याह · लुतिलुवर्णस्य ॥५॥
पितृल्तकइत्याह · पितृल्लृतकइत्याह · पितृतकइत्याह · ऋवर्णलुवर्णयोरेकत्वप्रतिज्ञानात् · लुत्वादेशोऋकृपिरादर्शनाद्दन्त्यत्वम् · च

कारोवेस्यानुकर्षणार्थम् · तेनात्तरत्रनानुपत्तिः · साचइत्यधिकारः · पदान्तेयेऽ · इतियावत् · दीर्घः ॥७७॥ अकःस्थानेऽचिपरेपरे
णाचासहितस्यतदासन्नोनित्यंदीर्घोऽदेशोभवति · दराज्ञाम्भूम् · सागतामुनीन्द्रः · नरीयम् · मधूदकम् · वधूदरम् · पितृभ्यः ·
पितृकारः · पितृतकः · लुवर्णस्यानुकरणादन्यत्र । दीर्घेनास्तीतिलुवर्णस्यऋकारएवदीर्घः शास्यत् ॥७८॥ अकःशास्यचिपरेणाचा
सहितस्ययथासंख्यंऋदीर्घेभवति · ताः शालाः बुद्धीः · चेन्द्रः · नदीः · वधूः मातृः · पश्य · नन्तः · पुंसः ॥७९॥ अकः पुल्लिंगसम्ब
न्धिनिशास्यचिपरेपरेणाचासहितस्ययथासंख्यमृदीर्घेनिकारान्तआदेशोभवति · जिनान् · मुनीन् · साधून् · पितॄन् · द्रलु
क्षणः ॥८०॥ ठकारस्येरफस्यचलुचिपस्यणादीर्घोभवति · लीढम् · गूढम् · पुनारात्रौ · अग्नीरथेन · पटूराजा · द्रलुक्साहव
र्यादिहनभवति · एवकरोति · सददाति · सहिवेहोस्योः ॥८१॥ सहिवेहारवर्णस्यद्रलुच्योकारोभवति · सोढा · वोढा ·
सोढ् · वोढ् · असेत्यधिकारस्थानिणेय्येऽडितियावत् · इक्येऽन् ॥८२॥ अस्यसाचइतिवर्त्तते · अवर्णस्यस्थानेऽकिपरेप
रेणाचासहितस्ययथासंख्यंएङ् अर् इत्येते आदेशाभवन्ति · देवेन्द्रः · मालेयम् · गन्धोदकम् · मालोढा · परमर्षिः · मह
र्षिः · तवत्कारः सत्कारः इत्यादिः · एङ्ग्रहणंकिं · नयनम् ॥८३॥ अयर्णस्यस्थानेएचिऊदादेशोचपरेसाचसदासन्नएजादेशोभ
वति · तवेषा · खट्वेषा · तवेन्द्रो · तवोदनः तवोपगवः उचि · धौतः · धौतवान् · प्रस्रोढा ऊह्यो पेय्ये ॥८४॥ प्रश्नाद्यस्यदवर्णान्तस्यस्था
ने ऊढऊढीऊह्यएष्यइत्येतेषुसाचआसन्नएजादेशोभवति · प्रौढः · प्रौढिः · प्रौहः · प्रेषः · प्रेष्यः · स्वैरक्षेर्म्यक्षौहिराधाम् ॥८५॥ स्वैर
स्वैरिन् अक्षौहिणीइत्येतेष्ववर्णस्यसाचरेजादेशोभवति · स्वस्यइरः स्वैरः · स्वयमीरितुं शीलमस्येतिस्वैरी · अक्षाणामूहोस्यामस्ती
तिक्षौहिणीः सेना · ओमादिपरः ॥८६॥ अवर्णस्यस्थानेओम् · शब्दे आङादेशोचपरेसाचः परोजादेशोभवतितवोंकारः कोमित्यवोच
न् · आङि · आनृश्यात् · अर्श्यात् · अद्यअर्श्यात् · अद्यर्श्यात् · खट्वर्श्यान् · आइहि · एहि · उपरिएहि · उपेहि · परायेहि · परेहि · आऊढा · ओढा
आरोढा · खट्वाढा · एवेनियोगे ॥८७॥ अवर्णस्यएवशब्देसाचःपरोजादेशोभवतिनचेत्स एवशब्दोनियोगविषयेअवधारणेवर्तते · नि
योगः इदमेवकर्तव्यमिति · इहेवदृश्यते · अयेवतिचतितत्रान्यस्थानमेतत् · अनियोगइतिकिं · अत्रैवत्वंतिष्ठेतिनियुज्यते · योहोनो
समासे ॥८८॥ अवर्णस्यओष्टशब्देओतुशब्देचपरेसाचः परोजादेशोभवतिवा · तौचेन्निमित्तंनिमित्तिनावेकप्रत्ययसमासेभवतः · वि

मेाहि·विम्बोहि·स्थूलोतुः स्थूलोतुः समासइतिकिं·राजपुत्रोष्टम्·पश्य·देवदत्तोतुविज्ञाभितमुपश्य·आर्हतीयायात्रमते॥८९॥
तृतीयान्तसम्बन्धिनोवर्णस्यस्थानेऋतशब्दपरेसान्त आरादेशोभवतिसमासेसुखलार्थः ऋत्याऽऽपस्तस्यैति पुनरग्रहणान्नेषा
नवाध्यते दुःखऋतः सुखऋतः तृतीयायाइतिकिं परिमर्तः समासइतिकिम् दुःखेनर्तः प्रदशार्णघसनकम्बलवत्सत
रस्वर्णे॥९०॥ प्रदश·ऋण·वसन·कम्बलवत्सतरइत्येतेषामवर्णस्यऋणशब्दपरेसान्त आर्भवति समासेसः प्रगतमृणम्प्रारभि
दशानाम्ऋणम्दशार्णम्·दशऋणानियस्यासादशार्णानदीदशार्णेजिनपदः ऋणावयवः ऋणम्ऋणाराभि·ऋणस्यऋणं
ऋणार्णम्·वसनमेवऋणम्·वसनार्णम्·एवंकम्बलार्णम्·वत्सतरार्णम्·हस्वोनवाध्यतइतिप्रऋणमित्यादिभवति·ऋत्याऽपस
र्गस्य॥९१॥ उपसर्गस्ययदवर्णन्तस्यस्थानेऋकारादौधातौपरेसान्त आर्भवति सर्वापवादः प्रार्च्छति प्रार्च्छति पुनरग्रहणह्र
स्वबाधनार्थम्सुपिवा॥९२॥ उपसर्गस्ययदवर्णन्तस्यस्थानेसुपिसुबन्तावयंवेऋकारादौधातौपरेसान्त आर्भवतिवा पक्षेपथा
प्राप्तम्·उपार्च्छीयति·उपर्च्छीयति·उपऋच्छीयति·उपात्कारीयति·उपात्कारीयति·उपत्कारीयति·तथानिर्णेयेऽऽउ॥९३॥
उपसर्गस्ययदवर्णन्तस्यस्थानेइर्णगैतौएधि·वृद्धौइत्येताभ्यामन्यस्मिन्नेउदेधातौपरेसान्तएऽादेशोभवति तथासुब्धातो
स्तवाम्नस्यति·प्रेषयति·उपोरवति·प्रोरवति·सुधातौउपेत्कीयति·उपेत्कीयति·उपोदनीयति·उपोदनीयति·अनिर्णेधीतिकिं·
उपेति·प्रेधते·पदान्तेसेऽः॥९४॥ पदान्तेयएऽस्यअकोरेपरेसान्तएऽभवति·तेत्र·पटोत्र·पदान्तइतिकिं·नयनम्·त
वनम्·तकारः·किं·पटवास्वः·गोरोहा॥९५॥ गोशब्दस्ययः पदान्तएऽस्यअकोरेपरेओकारोवाभवति·ओरोहत्वन
म्·अस्तिभावार्थम्·गोअग्रम्·गवाग्रम्·गोग्रम्·हेचित्रगोग्रमित्यप्राचित्रगोशब्दस्यलाक्षणि·कत्वान्नभवति·
अवोच्यनसे॥९६॥ गोशब्दस्यपदान्तेवर्त्तमानस्यएऽः अचिपरेअयइत्यादेशोभवतिनचेत्सोजक्षशब्दस्थः गवाग्र
म्·गोग्रम्·गोअग्रम्·गवीश्वरः गवीश्वरः·पदान्तइतिकिं·गवि·अनक्षइतिकिं·गोअक्षम्·गोक्षम्·इन्द्रे॥९७॥ गोशब्दस्या
दान्तेवर्तमानस्यएऽः इन्द्रशब्दस्थे अचिपरेअवेत्यादेशोभवति·गवेन्द्रः·वातायनेक्षे॥९८॥ गोशब्दस्यपदान्तेवर्त
मानस्यएऽः अक्षशब्दस्थेचिपरेवातायनेवाच्येअवइत्यादेशोभवति·गवाक्षः·वातायनमित्यर्थः·अन्यत्रगोक्षम्·गोअक्षम्·
नक्षुतस्यानेतौ॥९९॥ प्लुतस्यानितावचिपरेयत्रप्राप्नोतितत्रभवति·देवदत्ता·नु·अत्रन्वसि·जिनदत्ता·नु·इदमानय·अनितावि

तिकिम्·सुश्लोकानु इति·सुश्लोकेति·गितः गन्धबन्धस्याचिपरेतन्निमित्तंमत्वाह्नोतितन्नभवति·मुनीएतौ·साधूएतौ·पचेतेअत्र·पचा
वहे·अवाम्·चोदरचोनाऽः॥१०१॥ चादिरसत्वसाचीआऽवज्रिनोयोर्चतस्याचिपरेतन्निमित्तंनभवति·अअपेहि·इऽइन्द्रमुपश्य·ऽउतिष्ठ
आ एवन्नुमन्यसे·आएवंकिलतत्·अनांदइतिकिं·इधदुम्·आइहि·एहि·आऽदकान्तात्·ओदकान्तात्·प्रियमनुव्रजेत्·आआर्य्येभ्यः
आर्य्येभ्योस्ययशोगतम्·ईषद्येकियायोगे मर्य्यादाभिविधौचवः·एतमातिङितंविद्यादाख्यस्मरणायोरडित्·ओतः॥१०२॥ चादेरोकारान्ना
स्याचिपरेयत्रप्राप्नोति तन्नभवति·अहोइदम्·उताहोएवम्·अथो अम्मे- नोइन्द्रियम्·सौवेतौ॥१०३॥ सुनिमित्तोचओकारस्तस्य इतिशब्देप
रेयत्प्राप्नोति तन्नभवतिवा·पठोइति·पठविति·सावितिकिं·गवित्याह·उचोऽः॥१०४॥ उञित्येतस्य इतौपरेऽदित्यदीर्घानुनासिकआ
देशोभवतिवाचशब्दादन्यत्प्राप्नोतितच्चबाधभवति·एवन्त्वेरूप्यंभवति·ऊइति·उइति·विति·मयोचिबोसन्॥१०५॥ मभूइति प्र
त्याहारः मयउत्तरस्यउऽः स्थानेअचिपरेवकारोभवतिवा·सचासन्नभूतवत्·खडुडुनस्ते·खडुडुआस्ते·किम्वुष्णम्·किमुउष्ण
म्·तदुअस्यमतम्·किम्विति·किमूइति·किमुइति·किंविति अनेइतियम्·असत्वाद्धिल्मनुस्वारानुनासिकाभाव·हलोनुनासिकेनु
नासिकस्वः १०६ पदान्तेवर्तमानस्यहलरुछानेअनुनासिकेपरेस्थानिनःस्वोनुनासिकआदेशोभवतिवा·वाङ्मधुरा·वाग्मधुरा·षण्नयाः षः
ङ्याः तन्नयनम्·तऋयनम्·ककुभ्मराड्लम्·ककुभ्राड्लम्·हलमात्रम्·हल्मात्रम्·खडूइति·खण्डूइति·असन्निवेश·खडूइतिन्हस्वान्न
मइति ङित्वन्नभवति·प्रत्यये १०७ पदान्तेवर्तमानस्यहलरुछानेनुनासिकादौ मत्यये परेस्थानिनःस्योनुनासिकआदेशो भवति नित्यम्·
याञ्चयम्·षणम्·पदान्तइति किम्·यज्ञः स्वप्नः रीस्योः १०८ पदान्तेवर्तमानेरेफेसकारेचइकानुबन्धेपरेयः पूर्वस्तस्यस्थानेस्वोनुनासिको
भवति·कृपाति·कास्कानु·भवाञ्छादयति·ग्नाञ्जय्यपदान्ते १०९ मकारनकाराणाम् पदान्तेवर्तमानानाञ्जयिपरेनिमित्तस्वेनुनासिकोभवति
मस्य·गन्ता·गन्तुम्·नस्य·शङ्किता·शङ्कितुम्·बहुवचनन्नस्यणत्वबाधनार्थम्·विस्मयः आमिषन्ति अयदान्तइतिकिम्·नभवाचपरमः शल्लुनु
स्वारः ११० मकारनकाराणामपदान्तेवर्तमानानांस्थानेञ्झलिपरेनुस्वारोभवति·मस्यपुंसि·गंस्यते·नस्यदंशःयशांसि·मम्मोलितौ १११
पदान्तइतिपर्वते·ममूनरुणात् ममागमस्यपदान्तेवर्तमानस्यचमकारस्यस्वरुछानेहलिपरेतौनिमित्तस्योनुनासिकोनुस्वारश्चपर्यायेण

भवतः चक्रम्यते- चेक्रम्यते अभ्रलिहोवायुः अभ्रंलिहोवायुः मस्य-खङ्करोषि खंकरोषि सर्य्यन्ता संयन्ता-यदान्तइतिकिम्- गम्यते रम्यते-हिन्त्यग्निः॥११२॥ पदान्तेवर्तमानस्यमकारस्यरुग्गेरुचयमनइत्येतदर्णपरेहकारेपरेतेषांस्वोनुनासिकोनुस्वारश्चपर्य्यायेणभवतः किल्हादयति-किल्हादयति-किंह्रयते-किंह्रयते-कियत्यः किंत्याः किमम्हरुयति किंम्हरुयति-किन्हृषे-किंहृषे-सम्राट्॥११३॥समित्यस्यराज्ञोकि-बन्तेपरेअनुस्वाराभावोनिपात्यते-सम्राङ्पञ्चमःशांतिःस्वयूःस्वयः शरिवा॥११४॥पदान्तइतिनिवृत्तं स्वयः शरिपरेरवयादेशोभवतिवा-तच्छेतं-तच्छेते-वक्षः वस्सः अप्सराः अप्सराः शरोनुदे॥११५॥ शरः परस्यस्वयःस्थानेअनुयदन्यत्प्राप्नोतिसमिकृतेपश्चाद्धेरूपेभवतोवा-खंस्वनसि-खंस्वमसि-स्थाली-स्थाली-अन्वित्युत्कृत्वादसन्धिनिवृत्तमितिहिखेवर्त्तादिभवति-पुनःस्वयःपरस्यशरस्थानेहेरूपेभवतोवा-तच्छेते-तच्छेते-वत्सः वत्सः ययोमयः॥११६॥ यञः परस्यमयःस्थानेहेरूपेभवतोवा- वृक्षङ्करोति-वृक्षङ्करोति वल्मीकः कवल्मीकः अन्वित्येव-प्रोक्तुनाथ-ऊर्जिजयिषयति-पुनर्मयः परस्य यञः स्थानेहेरूपेभवतोवा दध्नत्र-दध्यत्र-मध्वत्र-मध्वत्र-त्रभ्वत्र-त्रभ्वत्र-अचोहोरुस्वः॥११७॥ अचः परोयोहकारोरेफश्चतायांपरस्य अरुत्वः हकारादेफादेश्चान्यस्यवर्णस्यस्थानेहेरूपेभवतोवा-ब्रह्म-ब्रम्ह-सर्व्वः सर्ब्ब-सर्व दीर्घः दीर्घः। अरुचइतिकिम्- वर्हः दर्हः अहम-अदीर्घात्॥११८॥अदीर्घादचः परस्याचःस्थानेहेरूपेभवतोवा-दध्यत्र-दध्यत्र पथ्यदनम्। पथ्यदनम्- त्वक्कु-त्वक्-त्वग्-त्वग्-गो-नुभ्रातः गो-नु-त्रातः अन्वित्यधिकारात्-कुत्वादीकृत्वेहि त्वम-अदीर्घादेकहल्ययनुत्तानसंयोगेत्वचीतियोगद्वयंभवति- विरामेप्ययमादेशः अरुचइतिकिं-सत्यम-वर्य्यः अर्य्यः ततश्चः अदीर्घादिति-किम-सूत्रम-पात्रम-वाक्-नसंयोगो॥११९॥ हल्लोनेतराःसंयोगः संयोगेपरेअस्चःस्थानेहेरूपेनाभवतः इन्द्रः कस्त्रम-पुत्रस्यादिपुत्रादिन्याक्रोशे॥१२०॥ पुत्रशब्दस्यआदिनशब्देपुत्रादिनशब्देचपरेआक्रोशविषयेहेरूपेनाभवतःपुत्रादिनीत्वमसिपापे पुत्रपुत्रादिनीभव-अन्यत्रपुत्रादिनीभव-अन्यत्रपुत्रादिनीशिशुमारी अचि॥१२१॥ अदीर्घात्परस्यअरुचःस्थानेअचिपरेहेरूपेनाभवतः दधि-मधु-शरः॥१२२॥ शरोचिपरेकेहेकपेनभवतःदर्शनम्। वर्षः तर्सः हस्वान्डमःपदान्ते॥१२३॥ ह्रस्वात्परस्यपदान्तेवर्तमानस्यडमःस्थानेअचिपरेहेरूपेभवतःकुड्-डास्ते-सगणिह-कुषञ्चिह-अभिर्द्यबहिरंगमन्तरंगेषुतिलुचिजस्लुग्भवति-चकदिति तठिनापिरुत्वमितिदकारान्तत्वंद्रष्टव्यम्-डाऽआजइतिकिं-छत्रुदिति-छदिनि-जगत्रुदिति-जगदिति-नद्युक्ते॥१२४॥ द्युक्तीयस्यतस्यडाऽआजोयोनृशब्दस्यइतीपरेलुग्भवति-पठत्पठदिति-घटद्घटदिति-भीक्षायद्यक्तिः पठत्यठदितिसमुदायानुकरणम्-तः॥१२५॥ द्युक्तेडिऽओऽतोयस्तकारस्तस्यइतीपरेलुग्भवति-पठत्पठेनिकरोति-घटद्घटेनिकरोतिडाच्यादौ॥१२६॥ द्युक्तेरादौपूर्वस्यामुक्तौअतोयस्तकारस्तस्यडाचिपरतोनित्यंलुग्भवति-पठन्पठाकरोति-धमधमाकरोति-द्रोद्री॥१२७॥ दकारस्यरेफस्यचयथासंख्यंदकारेरेफेचपरेलुग्भवति-रौदम-गूर्द्दम् अग्नीरथंनपुनारोति-हलोयमियमोवा॥१२८॥ हलःपरस्ययमोयथासंख्यं यमिपरेलुग्भवतिवा- आदित्यः आदित्य्यः केषाचिद्यमादितिपाठः तेषांवचनभेदाद्यथासंख्यंनास्तीत्युदाहरणनिर्दे- वार्य्यते-वार्य्यते-अरिजरःखेवा॥१२९॥ हलःपरस्यजरःस्थेजरिपरेलुग्वाभवति-भिन्नः भिन्नः भिन्नाम् भिन्नाम्-स्थेइतिकिम्- तप्ता-उदस्थास्तमः॥१३०॥ उदःपरस्यस्थास्तम्भोर्धातोरवयवस्यजरोजरिपरेनित्यंलुग्भवति-उत्थाता उत्थातुम्-उत्तम्भिना-उत्तम्भितुम्-उत्थाता-उत्तम्भितेतिधिसंयोगइति अदीर्घादितिहिनेनभवति-स्कन्दुरुत्-कन्दकोरोगइतिपृषोदरादिषुदृष्टव्यः चदृरा॥१३१॥ जरस्थानेजरिपरेचणेदेशोभवति-वेदच्छत्रम्-गुरुत्क्षिप्तरति-र्नृत्यते-रुषस्यते-ऋषिऋर्शवचनात्-स्वरिच्चर्त्वेऋजृषिजऋ॥१३२॥ जरस्थानेजषिपरेजश्चभवति-चरोपवादः-रुध्वा-रुध्वुम्-दोग्धा-वेद्धा-पड्भ्यः विद्युद्भद्रा-श्वोभ्वस्त्रो॥१३३॥ सकारस्यशकारेचवर्गेचोपश्लिष्टस्यस्थानेशकारआदेशोभवतिनथानवर्गस्यचवर्गः। आप्तश्छाभवते० तपश्चरति-यशश्चम् श्योतसि भृज्जति-नवर्गस्य-तच्छेते-भवाञ्छेते-तच्चरति-तच्छादयति-तञ्जयति तत्स्तयिति-भवान्चकोरण राज्ञायज्ञः समवचनेयाथासंख्यंशीलीयमाचार्यस्यज्ञापनात्॥ शोष्यदान्तइतिनिषेधात्परतोर्ष्यानिनिषेधा

श्रुत्व

स्यूर्वेचश्रुत्वपुत्वे-शोधु-॥१३४॥ सकारस्यषकारेरवर्गेचोपश्लिष्टस्यषकारोभवति॥ तथानवर्गस्यटवर्गः कष्यराडे-कृषीकते-कण्डूकष्टकोरणानवर्गस्यषेष्टा-तट्टीकते-तट्टकारेण॥नश्चात्॥१३५॥ शकारात्परस्यश्चुत्वंनभवति- अश्नाति-क्ष्णौति-शोष्यदांते

नाभनगरीनवतेः ॥१४०॥पदान्तेवर्तमानाद्दधर्गादुत्तरस्यधुत्वञ्च ॥भवतिनाम् ॥ नगरीनवतिशब्दान्धर्जीयल्लामधुलिट्सीदति॰षट्पथम्॰षरानयाः ॥ अनाभनगरी ॥नवैतेरितिकिं॰षणम्॰षेणगरी॰षणवतिः॥पञ्चन्नइतिकिम्॰इङ्हे॰पदान्तइत्यधिकारः आपादपरिसमाप्तेः॰तौर्यौ ॥१४१॥तवर्गस्यपदा न्तेवर्तमानस्यषकारे परेधुत्वंनभवति॰अग्निचित्॰षड्किः॰महान्॰षराट्॰लिखः ॥१४२॥ पदान्तेवर्तमानस्यनवर्गस्यस्थानेऽकारेपरेऽकारादेशो भवति॰तद्धुनाति॰जशोहोझषा ॥१४३॥पदान्तेवर्तमानाज्झशःपरस्यहकारस्यस्थानेयथासंख्यंझषाभवति॰अड्ढलौ॰त्वष्टुवृद्धुतम्॰वाग्घसति॰ वाग्गृहसति॰पदूदस्तानि॰पड्दस्तानि॰नद्धितम्॰नद्धितम्॰ज्ञश्छोमि॥१४४॥पदान्तेवर्तमानाज्झशउत्तरस्यशकारस्यछकारोभवतिवा॰तच्छो भते॰तच्छोभनेऽग्निष्टुप्छ्रयते॰वृष्टुप्श्रूयते॰ट्टोगग्नुक्शरी ॥१४५॥पदान्तेवर्तमानयोरेकारणकारयोःशरिपरेयथासंख्यंगकृङ्कृङ्इत्येतावागमौवा भवतः॰क्रुङ्क्ते॰क्रुगणङ्क्ते॰क्रुगणुङ्क्ते॰ङ्णस्तङ्सोश्वः ॥१४६॥पदान्तेवर्तमानाङ्ङकाराञ्चकाराञ्चपरस्यसकारस्यतडागमोवाभवति॰अश्वाःश्व संयोगस्याधयवश्चेत्सकारोनभवति॰मधुलिट्सीदति॰मधुलिट्सीदति॰भवान्त्संसदि॰ अश्वइतिकिम्॰षट्श्र्यानन्ति॰भवाञ्श्र्यातति॰नश्छिन्नत्॰ ॥१४७॥ नकारस्यपदान्तेवर्तमानस्यशकारेपरेजगागमोवाभवति॰अश्वःश्वःसंयोगस्यतुशकारेनभवति॰भवाञ्छेते॰भवाञ्छ्यति॰रुषञ्छेते॰रुषञ्छ्या ते॰भवाञ्छूरः॰भवाञ्छूरः॰नूनःपिरीरक्॥१४८॥नूनइत्येतस्यनकारस्यपदान्तस्थस्यषकारेपरेरीडनीकारानुबन्धआदेशोरक्यागमः॰पर्यायेणभवतो वा॰नूँड्ढाहि॰नृड्ढाहि॰नूनूषाहि॰कांस्कान्त्सीसक्॥१४९॥कानित्येतस्यशशन्तस्यद्विर्वचनेऽतेपूर्वस्यसीइतिईकारानुबन्धआदेशःसक्वागमः पर्यायेण णानिपात्यते॰कांस्कान्॰रीस्योरीकारोरीस्योरितिविशेषणार्थः॥छव्यम्यप्रशानः॥१५०॥प्रशान्वर्जितस्ययोनाकारस्तस्यपदान्तस्याम्॰परेछविपरतः सीरादेशःसक्वागमः पर्यायेणभवतः॰भवान्॰श्छादयति॰भवांश्छादयति॰भवांस्तरति॰भवांस्तरति॰छवीतिकिं॰भवान्फलति॰अमीतिकिं॰भवान्सरु कः॰ अप्रशानइतिकिम्॰प्रशान्वरिति॰पुमःखयि ॥१५१॥पुमित्येतस्ययदन्यन्तस्य पदान्तस्यअम्परेखयिपरतः॥सीसकोभवतः॰पुंस्कोकिलः पुंस्खातम्॥पुंस्खातम्॰पुंश्चली॰पुंश्चली॰ समस्कमिग्लुक्च ॥१५२॥स्कमिसस्सङ्कस्यकृञोधयवेसकारेपरेसमित्येतस्यसीसकोग्लुक्चभवन्ति सस्कर्त्ता॥सस्कर्त्तुम्॰संस्कर्त्ता॰संस्कर्त्तुम्॰संस्कर्ता॰संस्कर्तुम्॰गित्वमुत्तरार्थम्॰ध्योष्याघोभोभगोः॥१५३॥अवर्णादघोभोभगोर्ह्यनेतेभ्य श्चपरस्यपदान्तस्यषकारस्ययकारस्यचाषिपरेग्लुग्भवति॰दक्षहसति॰दक्षश्चेदमाचक्षणोदक्षञ्चदेवायान्ति॰अघोहसति॰भोदद्दाति॰भोगोदे हि॰पदान्तइतिकिम्॰गव्यम्॰ज्यम्॰भोव्योम॰अघ्यस्यष्टश्च ॥१५४॥अवर्णादयोभोभगोभ्यश्चपरयोःपदान्तयोर्योरचिपरेग्लुगस्यष्टः अघ्यक्तश्रु

तिश्वासन्नोभवति॰पठउ॰पठन्तु॰तउ॰तयु॰अघोउ॰अघोयु॰अघोअत्र॰अघोयत्र॰भोअत्र भोयत्र॰भगोअत्र॰भगोयत्र॰ग्लुचिगित इतिसन्धिप्रतिषेधार्थः वा नुड्यात्॥१५५॥अवर्णात्परस्यपदान्तेय्यःउञ्वञ्जिते अचिपरेग्लुगस्यष्टश्चादेशोवाभवतः॰पक्षेनादवस्थ्यम्॰पठइह॰पठविह॰पठविह॰देवाय्रासते॰दे वायासते॰देवायासते॰पदान्तइतिकिम्॰नयनम्॰लवनम्॰रेर्य्यः॥१५६॥अवर्णदघोभोभगोभ्यश्चपरस्यरेरिकारानुबन्धस्यस्थानेअधिपरेयकारो भवति॰देवायांसते॰देवाहसन्ति॰अघोयत्र॰अघोहसति॰भोयास्ते॰भोराजा॰भगोयास्त्व॰भगोदयसे॰रेरितिकिम्॰ अन्तर्दयते॰आतोऽदृथुः॥१५७॥अ कारात्परस्यरेःस्थानेअकारेहषिचपरेउकारआदेशोभवति॰यत्वापवादः॰श्रवणोऽसि॰धर्मोजयति॰तकारःकिम्॰देवा अत्र॰देवायान्ति॰स्रुस्रोता॰नु॰ अत्रन्वसि॰स्रुस्रोतादेहि॰सर्वज्ञआस्ते॰रेरिकिम्॰ अन्तरस्मि॰ह्रस्वनञ्समासेसुक्तस्सात्॥१५८॥तकारस्थानिकाकारात्परस्यरेर्हलिपरेलुगभवतिनचेत्स कारोनञ्समासेभवति॰एषकरोति॰सदृदाति॰परमैषकरोति॰परमसदृदाति॰ह्लीतिकिम्॰एषोऽस्मि॰सोऽस्मि॰अनञ्समासइतिकिम्॰अनेषोगच्छति॰ असोगच्छति॰नदः पादपूरणे ॥१५९॥तदादेशात्सकारादुत्तरस्यरेरचिपरेअनञ्समासेलुग्भवति॰ पादपूरणेविषयेऽपेचेत्पादःपूर्य्यते॰ सैषदाशरथीरामः॰सैषराजायुधिष्ठिरः॰सैषकर्णोमहात्यागी॰सैषपार्थोधनुर्धरः॰ पादपूरणइतिकिम्॰ सएषभरतोराजा॰योन्याय्येपथिवर्त्त ते॰रोश्नोत्यरुत्रूषरात्रिरथन्तरे॥१६०॥अहन्नित्येतस्यरेरचिपरेरेफादेशोभवति॰नस्रुत्रूषरात्रि रथन्तरेषु॰ अहरेति॰अहरर्दाति॰ अस्रुत्रूषरात्रि रथन्तरइतिकिम्॰अहोभ्याम्॰अहोभिः॰दीर्घाहाय यम्॰अहोरूपम्॰ गतमहोरात्रिरागताः अहोरथन्तरम्॰विसर्जनीयस्य॥१६१॥विसर्जनीय स्याधिपरेरेफोभवति॰मुनिरस्ति॰साधुरस्मि॰सञ्जूर्जयति॰पितर्दयसे॰विसर्जनीयस्येत्यधिकारः आपादपरिसमाप्तेः॰गार्हपत्यादिषु॥१६२॥अर्हैप तीत्येवमादिषुशब्देषुविसर्जनीयस्यस्थानेरेफोभवतियाअर्हैपतिः॰अर्हःपतिः॰गीर्पतिः॰गीष्पतिः॰धूर्पतिः॰प्रचेताराजन्॰वारेफादत्रारेरुत्वबाध याषक्षेविसर्जनीयः॰सञ्चव्यशरि॥१६३॥विसर्जनीयस्यस्थानेअशर्परेछपिपरतःसकारोभवति॰कच्छादयति॰कस्तरति॰अन्तस्थुडति॰ मा नष्टकरेण॰अशरीतिकिम्॰ असेदत्सकः॰शरिवा॥१६४॥विसर्जनीयस्य अशर्परेशरिपरे सकारोवाभवति॰कश्शेभते॰कःशेभते॰मानष्परा ई॰मातःपराडे॰अन्तस्सिन्कः॰ अन्तःसिन्कः॰लुक्खयिपरे ॥१६५॥विसर्जनियस्य(कवर्गीयेपवर्गीयेचाशर्परेखयिपरे)ङ्कःपु)खयिपरेशा रिपरलोलुग्वाभवति॰अन्तस्खलति॰अन्तस्खलति॰अन्तःस्खलति॰चक्षुस्यन्दते॰चक्षुःस्यन्दते॰चक्षुःस्यन्दते॰कुपोंकङ्कम्॰॥१६६॥विस र्जनीयस्यकवर्गीयेपवर्गीयेचाशर्परेखयिपरेङ्कःपइत्येतौजिह्वामूलियौपध्मानीयौयथासंख्यमादेशौवाभवतः॰कङ्करोति॰कःकरोति॰कङ्क॰

नति·कः·खनति·कः·खनति·अन्तरुपचति·अन्तरुकलति·अन्तः·फलति·अशर्परइतिकिम्·वासः·क्षौमम्·दृष्टिः·ज्ञानम्·खयितिकिम्·अन्तर्गच्छति·अन्तर्धापते·तिरसः·तेः·मिः॥१६७॥तिसंज्ञकस्यतिरसशब्दस्यसम्बन्धिनोविसर्जनीयस्यस्थानेकवर्गीयेपवर्गीयेचाशर्परेखयिपरेसिः इकारानुबन्धआदेशोभवतिवा· तिरस्कृत्य·तिरःकृत्य तिरस्करोति तिरःकरोति·तेरितिकिम्·तिरःकृत्वा·नमस्पुरसः॥१६८॥ नमस्पुरसइत्येतयोस्तिसंज्ञकयोःसंबन्धिनोविसर्जनीयस्यकृपावशर्परेखयिपरेसिर्भवति· नमस्कृत्य· नमस्करोति·पुरस्कृत्य·पुरस्करोति· योगविभागोनियार्थः॥ चतुर्निर्दुर्बहिराविष्प्रादुसाम्॥१६९॥चतुरनिस्दुस्बहिस्आविस्प्रादुसइत्येतेषांविसर्जनीयस्यकृपावशर्परेखयिपरेसिर्भवति· चतुष्कं· चतुष्पात्रं निष्करोति· निष्पचति·दुष्करोति·दुष्पचति·बहिष्करोति·बहिष्पचति·आविष्करोति·आविष्पचति·प्रादुष्करोति· प्रादुष्पचति· निष्कुलः दुष्पुरुषः सर्वोवा॥१७०॥सकचप्रत्ययान्तस्यविसर्जनीयस्यकृपावशर्परेखयिपरेसिर्वाभवति·द्विष्करोति·द्विष्करोति·द्विष्पचति· चतुष्पचति·चतुरुपचति·इसकसोरपेक्षयां॥१७१॥इसुसुस्प्रत्ययान्तस्यसंबन्धिनोविसर्जनीयस्यकृपावशर्परेखयिपरेसिर्वाभवतिस्व निनिमित्तपदेचेत्सरस्परापेक्षायामभवतः सर्पिष्करोति·सर्पिःकरोति·सर्पिःकरोति·सर्पिष्पिबति· सर्पिःपिबति·धनुष्वराडयति धनुःखराडयति धनुःष्कलति·धनुःफलति· परसर्पिःकरोति परमसर्पिःकरोति· परमधनुष्कलति·परमधनुःफलति· इसासाहचर्य्यादुसोतिहोअग्रहणादिहनभवति·चक्रुःकलहानि·शिन्धुःपापानि अपेक्षायामितिकिम्· तिष्ठतुसर्पिःपिबत्वमुदकम्। नाक्रियेकार्थे॥१७२॥ इसुसुस्प्रत्ययान्तस्यविसर्जनीयस्यस्थानेकुपावशर्परेखयिक्रियापदवर्जितसमानाधिकरणपदस्थेपरेस्थानिनिमित्ते। पदयोरपेक्षायांसिर्नभवति·सर्पिःकालकं·यजुःपीतकम्·क्रियाप्रतिषेधःकिम·सर्पिष्क्रियते·सर्पिःक्रियते· एकार्थइतिकिम्·सर्पिष्कुम्भी· सर्पिःकुम्भेसमासे समस्तस्य॥१७३॥इसुसुप्रत्ययान्तस्यपूर्वेणासमस्तस्यसम्बन्धिनोविसर्जनीयस्यस्थानेकुपावशर्परेखयिपरेसिर्भवतितेचेत्स्थानिनिमित्तपदेएकप्रस मासेभवतः सर्पिष्कुराडम्·सर्पिष्यानम्·धनुष्वराडम्·धनुष्फलम् समासेइतिकिम्· तिष्ठतु सर्पिःपिबसुमुदकम्· असमस्तस्येतिकिम्· परमसर्पिःकुराडम्·इंद्रधनुःखराडम्·पदेधः शिरसः॥१७४॥ पूर्वेणाकृतसमासयोः अधस्शिरस इत्येतयोर्विसर्जनीयस्य पदशब्देपरेस मासेसिर्भवति·अधस्पदम्·शिरस्पदम्·समासेइतिकिम् अधःपदम्·शिरःपदम्·असमस्तस्येतिकिम्·परमशिरःपदम्·कृकमिकंसकुशाकर्णीकुंभपातोव्ययस्या॥१७५॥अनव्ययस्यपूर्वेणासमस्तस्यसम्बन्धिनोकारात्परस्यविसर्जनीयस्यस्थानेदुष्कृत्करणेकमूः कान्तोकं

MEMORIAL

सकुशाकर्णीकुम्भपात्रइत्येषुपरतःसमासेसिर्भवति·अयस्कृत्·अयस्कारः·पयस्कामः·यशस्कामः·अयस्कंसः अयस्कुशा·अयस्कर्णी·अयस्कुम्भः·पयस्कुम्भी·पयस्पात्रम्·पयस्पात्री·प्रातिपदिकग्रहणंलिङ्गविशिष्टस्यापिग्रहणम्·तेनस्त्रियां भवति·अनव्ययस्येतिकिम्·स्वःकामः समासइतिकिम्·अयकः करोति·असमस्तस्येतिकिम्·परमयशःकामः·शीलिकामीतिणविधौकामिग्रहणादत्रायतनग्रहणम्·तेनस्त्रियांपयस्कामीतिभवति·प्रत्ययेति॥१७६॥ अनव्ययस्यसम्बन्धिनोविसर्जनीयस्यकुपावशर्परेखयिप्रत्ययस्थेपरेसिर्भवति· काम्य·कम·क·पाशाः·प्रत्ययायोजयन्तियशस्काम्यति· शीष्कलम्·यशस्कम्·यूष्माशा·स्मयूष्माशा·नरस्मःकाम्ये॥१७७॥रेफान्तस्याश्चविसर्जनीयस्यकाम्यप्रत्ययेसिर्भवति· धूःकाम्यति॰अहःकाम्यति·हस्वात्सःपस्यति॥१७८॥हस्वात्परस्यविसर्जनीयस्यसकवन्नाहिहितेतकारादौप्रत्ययेसिर्भवति तरतम तमप्तयत्वनत्वत्याःप्रत्ययायोजयन्ति·सर्पिष्टरम्·सर्पिष्टमम्· सर्पिष्टः· चतुष्टयम्· चतुष्ट्वम्·चतुष्टा·निष्पः निसोनासे वायान्ये॥१७९॥निसःसम्बन्धिनोविसर्जनीयस्यतकारादौतपतोपरतःसिर्भवति· अनासेवायामर्थे·असेवापुनःपुनःकरणम्·निष्टप्तंस्वर्णम्·अनासेवायामितिकिम्· निस्तप्तंस्वर्णंस्वर्णकारः तीनिकिम्·निरतपत्·शप्निर्देशादिहनभवति·निस्तातप्तं।निपाशपानुबन्धेन निर्दिश्यद्गृणेनच· यच्चैकाद्गृहणंकिंचित्पच्चैतानिनयद्यश्चुचि·कस्कादिषु॥१८०॥कस्कइत्येवंप्रकारेषुशब्देषुविसर्जनीयस्यस्थानेकवर्गीयेपवर्गीयेचाशर्परेखयि परेसिरादेशोभवति·कस्कः·कौतस्कुतः सर्पिष्कुरिडकादिगणपाठःसमस्यार्थः तेनपरमसर्पिष्कुरिडकेत्यादिसिद्धम्·बहुवचनादाकृतिगणोयम्· तेनभास्करइत्यादिसिद्धम्॥ ॥इतिशब्दानुशासनेचिंतामणौव्याख्यातोप्रथमस्याध्यायस्यप्रथमःपादः॥॥ श्रीवीतरागायनमः॥ ॥नपोचोह्रस्वः॥१॥इयमयमिदमितिशब्दव्यवस्थाहेतुरूपदेशगम्यःप्रातिपदिकार्थधर्मोलिंगम्·स्त्रीपुन्नपुंसकत्वानि·नपः नपुंसकार्थाभिधायिनोजन्तस्यशब्दरूपस्यह्रस्वादेशोभवति·क्षीरपम्·मामणि·नतभ्रू·अनिहि·अतिरि·अतिद्यु·अतिनु·कुलम् नपतिइतिकिम्·क्षीरपाः मामणीः स्त्रीपुमान्वा·पच्चतोनेकतरस्यान्यादेर्ङेङसोः॥२॥ नपुंसकाभिधायिनांसर्वाद्यन्तर्वर्तिनांपच्चानामन्यादीनांशब्दानांतत्सम्बन्धिनोःस्अमित्येतयोःपरतःदगागमोभवति· एकतरशब्दंवर्जयित्वा· अन्यतिष्ठति·अन्यत्पश्यहे अन्यत्·अन्यतरत्·इतरत्·कतमत्·अनेकतरस्येति·किम्·एकतरतिष्ठति·एकतरंपश्य· नपइतिकिम्·अन्यःपुरुषः अन्यास्त्री·तत्सम्बन्धिविज्ञानादिहनभवति· प्रियान्यम्·अन्यं कुलम्· इहतुभवपरमान्यन्तिष्ठति·परमान्यत्पश्यति·अस्त्रवा॥३॥योनडान्सुगितिनस्त्रोभावःप्रतिषेधउक्तःसनपुंसकस्य

वाभवति॰ भोचर्म॰ भोचर्मन्॰ भोदगिड॰ भोदगिडन्॰ कुल॰ अतोम्॥ ४॥अकारान्तस्यनपुंसकस्यसम्बन्धिनोःस्वमोरमित्यादेशोभवतिश्चुचौ
परवादः॰ धनन्तिष्ठति॰ धनमपश्य अमूविधानंतु समर्थम्ः। अतिजरसंकुलन्तिष्ठति॰ श्रुकू ॥५॥नपुःसम्बन्धिनोःस्वमोःश्रुग्भवति॰ दधि
तिष्ठति॰ दधिपश्य॰ मधुकराडूयत्॰ तत्कुलम्॰ जरसोवा॰॥ ६॥ जरसन्तस्यनपुःस्वमोःश्रुग्वाभवति॰ अतिजरः॰ अतिजरसं॰ कुलम्॰ इकोल्लु
क् ॥७॥ इगन्तस्यनपुः संबंधिनोःस्वमोःश्रुग्लुग्वद्वाभवति॰ भोवारिः॰ भोवारि॰ भोपोम्॰ भोवपु॰ भोकर्तृः॰ भोकर्तृ॰ प्रियतिसृकुलम्॰ प्रियत्रिकुलम्॰
श्रुचौलुग्वचनमम्ः सर्वलोपार्थे॰ पुर्मांश्चान्यतोच्यापि ॥८॥ यदिगन्तंशब्दरूपमन्यतोविज्ञेष्यवशान्नपुंसकार्थेवर्तते तदस्योज्ञादावापिटा
दौरूपिपरेपुंवद्भावभवति॰ नम्॰ ह्रस्वोनभवत इत्यर्थः॰ ग्रामण्याकुलेनग्रामणिनाकुलेन॰ ग्रामण्ये॰ ग्रामणिने॰ ग्रामण्यः॰ ग्रामणिनः॰ ग्रामण्यः॰
ग्रामणिनः॰ ग्रामण्यः॰ ग्रामणिनः॰ ग्रामण्योः॰ ग्रामणिनोः॰ ग्रामण्यां॰ ग्रामणीनां॰ ग्रामण्यां॰ ग्रामणिनि॰ ग्रामण्योः॰ ग्रामणिनोः॰ एवंकर्ता॰ क
र्तृणा॰ कर्त्रे॰ कर्तृणे॰ कर्तुः॰ कर्तृणः॰ कर्त्रोः॰ कर्तृणोः॰ कर्तृणि॰ कर्त्तरि॰ शुचये॰ शुचिने॰ मृदवे॰ मृदुने॰ शुचेः॰ शुचिनः॰ मृदोः॰ मृदुनः॰ शुचोः॰
शुचिनोः॰ मृदोः॰ मृदुनोः॰ शुचौ॰ शुचौ॰ शुचिनि॰ मृदौ॰ मृदुनि॰ अन्यतइतिकिम्॰ त्रपुणे॰ जतुने॰ पीलुने॰ फलाय॰ अचीतिकिम्॰ ग्रामणिभ्याम्॰
ग्रामणिभिः॰ अपीतिकिम्॰ ग्रामणिनी॰ शुचिनी॰ कुले॰ इकइतिकिम्॰ कीलालपेनकुलेन॰ दध्यस्थिसक्थ्यक्ष्णोनङ्॥ १॥ दधिअस्थि
सक्थिअक्षिइत्येतेषामिगन्तानांनपुंसकानामनङादेशोनित्यंभवतितत्सम्बन्धिन्यसम्बन्धिनिवाआज्ञादावापिपरे॰ दध्ना॰ दध्ने॰ दध्नि॰ द
धनि॰ अस्थ्ना॰ अस्थ्ने॰ अस्थ्नि॰ अस्थनि॰ सक्थ्ना॰ सक्थ्ने॰ सक्थ्नि॰ सक्थनि॰ अक्ष्णा॰ अक्ष्णे॰ अक्ष्णि॰ अक्षिणि॰ प्रियदध्ना॰ परमास्थ्ना॰ अतिसक्थ्नना॰
प्रियाक्ष्णा॰ पुरुषेण॰ प्रियदध्यां॰ परमास्थ्न्या॰ स्त्रिया॰ अचीतिकिम्॰ दध्न्यां॰ दध्नि॰ आपीतिकिम्॰ दध्नी॰ दध्नीनि॰ नपुंसइति॰ दधिना॰ दध्ये॰
दधिनामाकश्चिन्॰ नम्॰ रुपि॥ १०॥ इगन्तस्यनपुंसजादौरूपिपरेनागमोभवति॰ वारिणी॰ कर्तृणी॰ कुले॰ वारिणा॰ वारिणो॰ वारिणः॰ वारिणोः॰
वारीणां॰ वारिणि॰ शावचः॥ ११॥ अजन्तस्यनपुंशोजश्चासश्शिरित्येतस्मित्परेनभवति॰ धनानि॰ वनानि॰ वारीणि॰ त्रपूणि॰ कर्तृणि॰ कुलानि॰
जलाम्॰॥ १२॥ अचःपरायाजस्जातिस्तदन्तस्यनपुंशोपरेनित्यंनभवति॰ उदश्विन्ति॰ पयांसि॰ काष्ठतक्षि॰ अचइतिकिम्॰ बह्वर्जि॰ सूर्जि॰ त
तःप्रागार्य्यवज्रस्य॥ १३॥ जस्जन्तस्यनपुंशोपरेततोन्यायाजस्जातेःप्रागार्य्यवज्रस्याचार्यस्यमतेननभवति॰ बहुरज्ञि॰ सूरज्ञि॰ अज्ञेःशतु
॥ १४॥ अजभवतिङिर्यस्मात्ततोऽङेर्हिरुक्ताज्जश्शसादिपञ्चकात्परेयः शत्प्रत्ययस्तदंतस्यनपुंशोपरेआर्यवज्रस्यमतेमनभवति॰ अन्येषांनभव

वति॰ ददन्ति॰ ददति॰ दधन्ति॰ दधति॰ जक्षन्ति॰ जक्षति॰ जाग्मन्ति॰ जाग्मति॰ दरिद्रन्ति॰ दरिद्रति॰ चकासन्ति॰ चकासति॰ शासन्ति॰ शासति॰ कुलानि॰ अङ्गेरि
तिकिम्॰ पचन्तिकुलानि॰ ननम् ॥१५॥अङ्गेः परोयःशानतदंतस्यशत्रंरूपस्ययोनम्॰ प्राप्नोतिससर्वोनभवति॰ ददती दधती॰ स्त्रीददतीं॰ दधतीं॰ कुले॰
ददत् ददतौ ददतः॰ ददतम् ददतौ॰ एवम्॰ जक्षत्॰ जक्षतौ॰ जक्षतः॰ जक्षतम्॰ जक्षतौ॰ इत्यादि॰ ङीग्योर्वादश्च॥१६॥ श्नाबहिनादवर्णान्नात्परोयःशानतद
न्तस्यङीगी इत्येतयोः परयोर्नभवतिवा॰ तुदन्ती॰ तुदती॰ स्त्री॰ तुदन्ती॰ तुदती॰ कुले॰ एवं॰ करिष्यँन्ती॰ करिष्यन्ती॰ भान्ती॰ भाती॰ अश्नइतिकिम्॰ क्रीणती
स्त्री॰ क्रीणती॰ कुले॰ शपश्यात् ॥१७॥ अवर्णाच्छपःश्याच्चपरस्यशतुर्ङीग्योर्न्नित्यंनभवति॰ भवन्ती॰ स्त्री॰ भवन्ती॰ कुले॰ दिव्यन्ती॰ स्त्री॰ दीव्यन्ती॰ कुले॰
आदितिकिम्॰ घ्नती॰ अदती॰ जश्शसःशिः॥ १८॥ नपुंसम्बन्धिनोजस्शसइत्येतयोःस्वमोःशिरित्यादेशोभवति॰ वनानि॰ तिष्ठन्ति॰ धनानिपश्यवा
रीणि॰ त्रपूणि॰ कर्तृणि॰ यशांसि॰ आडश्चौनोर्गी ॥१९॥ नपुंसआङन्तस्यचसम्बन्धिन औकारस्यस्थानेनागित्ययमादेशोभवति॰ वनेतिष्ठतः॰
वनेपश्य॰ त्रपुणी॰ कर्तृणी॰ यशसी॰ आडः॰ बहुराजेनगय्यो॰ शालेतिष्ठतः॰ शालेपश्य॰ परमशाले॰ तत्सम्बन्धिविज्ञानादिहनभवति॰ प्रियशालो
मौमो॰ आडइतिकिम्॰ क्षीरपो॰ हितोयातृ॰॥ २०॥ आडन्तस्यसम्बन्धिनःङकारानुबन्धस्यस्थानेयाडागमोभवति॰ शाल्यर्थे॰ शाल्यायाः॰ शाल्यायाः॰ शाल्या
याम्॰ बहुराज्ञीज्ञय्ये॰ बहुराजायाः॰ बहुराजायाः॰ बहुराजायाम्॰ टोस्येत्॥ २१॥ आङन्तस्यसम्बन्धिनोःटाओसित्येतयोःपरतः एकारादेशोभवति॰
शाल्यया॰ शाल्ययोः॰ परमशाल्यया॰ परमशाल्ययोः॰ इदुतोगिग्योर्नोरूचे॰॥ २२॥ इकारादुकाराच्चँपरस्यऔकारस्यस्थानेयथासंख्यंगिगु इत्येतावादे
शौभवतः॰ स्त्रीशब्देकारंवर्जयित्वा॰ पतीतिष्ठतः॰ पतीपश्य॰ साधूतिष्ठतः॰ साधूपश्य॰ आस्त्रेरितिकिम्॰ अतिस्त्रियौपुरुषो॰ अस्त्रेरितीदमेवज्ञापकंइ
युवपवादेनेदुत्कार्यंभवतीति॰ तेनातिस्त्रयः॰ सहस्त्रयः॰ इत्यादिसिद्धम्॰ अस्त्रेङ् ॥ २३॥ इकारान्तस्यउकारान्तस्यचजरिपरे एङ्भवति॰ पतयः॰
साधवः॰ बुध्नयः॰ धनवः॰ ङिरोन् ॥ २४॥ इकारादुकाराच्च परस्यङिइत्येतस्यौदित्यय मादेशोभवति॰ सख्यौ॰ पत्यौ॰ न्यंशादाम्॰॥ २५॥ नीत्येतस्मादं
शादवयवाद्घाटःआठश्च परस्यङेरामित्य यमादेशोभवति॰ नियाम्॰ ग्रामण्याम्॰ शाल्यायाम्॰ बहुराजायाम्॰ नद्याम्॰ वध्याम्॰ घेर्ङिरनाट्॥ २६॥
धिसंज्ञकात्परोयोङिः॰ तस्यानाट्॰ ङीरतिङिदौदादेशोभवति॰ मुनौ॰ साधौ॰ धनौ॰ घेरितिकिम्॰ सख्यौ॰ पत्यौ॰ पताविति केचित्॰ अनाङितिकिम्॰
बुध्याम्॰ धेन्वाम्॰ नास्यीटः॥ २७॥ घेरस्त्रीविषयस्यटस्मृतीयेकवचनस्यनाइत्यादेशोभवति॰ मुनिना॰ साधुना॰ अतिपतिना॰ अस्त्रीतिकिम्॰ बुध्या
धेन्वा॰ घेरितिकिम्॰ सख्या॰ पत्या॰ ङेङ् ॥ २८॥ धिसंज्ञकस्यङिङ॰ कारादौरूपिपरेएङ्भवति॰ मुनये॰ साधवे॰ मुनेः साधोः॰ बुध्नये॰ धेनवेङीति

